শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রী ৱল্লভাচার্য ৱিরচিতং

॥ শ্রী নন্দকুমারাষ্টকম্ ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

শ্রী রঙ্গরামানুজ মহাদেশিকন্

His Holiness śrīmad āṇḍavan śrīraṅgam

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

॥ শ্রী নন্দকুমারাষ্টকম্ ॥

সুন্দরগোপালম্ উরবনমালং নযনবিশালং দুঃখহরং
বৃন্দাবনচন্দ্রম্ আনন্দকন্দং পরমানন্দং ধরণিধরম্।
বল্লভঘনশ্যামং পূর্ণকামম্ অত্যভিরামং প্রীতিকরং
ভজ নন্দকুমারং সর্বসুখসারং তত্ত্ববিচারং ব্রহ্মপরম্॥ **1**॥

সুন্দরবারিজবদনং নির্জিতমদনম্ আনন্দসদনং মুকুটধরং
গুঞ্জাকৃতিহারং বিপিনবিহারং পরমোদারং চীরহরম্।
বল্লভপটপীতং কৃত উপবীতং করনবনীতং বিবুধবরং
ভজ নন্দকুমারং সর্বসুখসারং তত্ত্ববিচারং ব্রহ্মপরম্॥ **2**॥

শোভিতমুখধূলং যমুনাকূলং নিপট অতূলং সুখদতরং
মুখমণ্ডিতরেণুং চারিতধেনুং বাদিতবেণুং মধুরসুরম্।
বল্লভমতিবিমলং শুভপদকমলং নখরুচি অমলং তিমিরহরং
ভজ নন্দকুমারং সর্বসুখসারং তত্ত্ববিচারং ব্রহ্মপরম্॥ **3**॥

শিরমুকুটসুদেশং কুঞ্চিতকেশং নটবরবেশং কামবরং
মাযাকৃতমনুজং হলধর অনুজং প্রতিহতদনুজং ভারহরম্।
বল্লভব্রজপালং সুভগসুচালং হিতমনুকালং ভারবরং
ভজ নন্দকুমারং সর্বসুখসারং তত্ত্ববিচারং ব্রহ্মপরম্॥ **4**॥

ইন্দীবরভাসং প্রকটসুরাসং কুসুমবিকাসং বংশিধরং
হৃতমন্মথমানং রূপনিধানং কৃতকলগানং চিত্তহরম্।
বল্লভমৃদুহাসং কুঞ্জনিবাসং বিবিধবিলাসং কেলিকরং
ভজ নন্দকুমারং সর্বসুখসারং তত্ত্ববিচারং ব্রহ্মপরম্॥ **5**॥

অতিপরপ্ররীণং পালিতদীনং ভক্তাধীনং কর্মকরং
মোহনমতিধীরং ফণিবলরীরং হতপররীরং তরলতরম্।
রল্লভব্রজরমণং রারিজরদনং হলধরশমনং শৈলধরং
ভজ নন্দকুমারং সর্রসুখসারং তত্ত্বরিচারং ব্রহ্মপরম্॥ **6**॥

জলধরদ্যুতি অঙ্গং ললিতত্রিভঙ্গং বহুকৃতরঙ্গং রসিকররং
গোকুলপরিরারং মদনাকারং কুঞ্জরিহারং গূঢতরম্।
রল্লভব্রজচন্দ্রং সুভগসুছন্দং কৃত আনন্দং ভ্রান্তিহরং
ভজ নন্দকুমারং সর্রসুখসারং তত্ত্বরিচারং ব্রহ্মপরম্॥ **7**॥

রন্দিতযুগচরণং পারনকরণং জগদুদ্ধরণং রিমলধরং
কালিযশিরগমনং কৃতফণিনমনং ঘাতিতযমনং মৃদুলতরম্।
রল্লভদুঃখহরণং নির্মলচরণম্ অশরণশরণং মুক্তিকরং
ভজ নন্দকুমারং সর্রসুখসারং তত্ত্বরিচারং ব্রহ্মপরম্॥ **8**॥

॥ ইতি শ্রী নন্দকুমারাষ্টকং সমাপ্তম্॥